मन्त्र - अन्वेको वदति यद्ददाति तद्रूपा मिमन्तदंपा एक ईयते ।
विश्वा एकस्य विनुदंस्तितिक्षते यस्ताकृणोः प्रथमं सास्युक्थ्यः ।। 3 ।।

पदपाठ- अनु। एकः। वदति। यत्। ददाति। तत्। रूपा। मिनन्। तत्ऽअपाः। एकः। ईयते।
विश्वाः। एकस्य। विऽनुदः। तितिक्षते। यः। ता। अकृणोः। प्रथमम्। सः। असि।
उक्थ्यः ।। 3 ।।

मन्त्रार्थ- {यजमान} जो {हवि देवों को} देता है, उसे एक {होता} {अनुमोदन करता हुआ} बोलता है। एक { अध्वर्यु} पशु आदि रूपों का {भेद करता जाता है} देवयजन हेतु सब जगह जाता है । एक की अध्वर्यु सब करने योग्य कर्मों का विक्षेपणरूप कर्मों का विस्तार करता है। उस कर्म के योग्य प्रायश्चित्त कर्म से ब्रह्मा {क्षमा याचन ।} करता है । जिस तूने उनके लिए {उनकर्मों को} सर्वप्रथम किया वह {तू} प्रशंसनीय है ।

मन्त्र- प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते ।
असिन्वन्दंष्ट्रैः पितुरत्ति भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः ।। 4 ।।

पदपाठ- प्रऽजाभ्यः। पुष्टिम्। विऽभजन्तः। आसते। रयिम्ऽइव। पृष्ठम्। प्रऽभवन्तम्।
आऽयते। असिन्वन्। दंष्ट्रैः। पितुः। अत्ति। भोजनम्।
यः। ता। अकृणोः। प्रथमम्। सः। असि। उक्थ्यः ।। 4 ।।

मन्त्रार्थ- हे इन्द्र ।{तुम्हारे द्वारा प्रदत्त} पोषक धन प्रजाओं हेतु बाँटते हैं । {विभाग करते हुए गृहमेधिन् अपने घरों में निवास करते हैं}। घर आये अतिथि के लिए भरण समर्थ धन सामर्थ्यानुसार बाँटकर जाते हैं। सेतुबन्धादि कर्म करते हुए लोक में द्युलोक के समीप आये हुए जलों तथा ओषधियों को दाँतों से खाते हैं। हे {इन्द्र} जिस तूने उनके लिए {उन कर्मों को} सर्वप्रथम किया, वह तू प्रशंसनीय है ।

मन्त्र - अधाकृणोः पृथिवीं संदृशे दिवे यो धौतीनामहिहन्नारिणक्पथः ।
तं त्वा स्तोमेभिरुदभिर्न वाजिनं देवं देवा अजनन्त्सास्युक्थ्यः ।।5।।

पदपाठ- अध । अकृणोः । पृथिवीम् । सम्ऽदृशे । दिवे । यः । धौतीनाम् । अहिऽहन् । अरिणक् । पथः ।
तम् । त्वा । स्तोमेभिः । उदऽभिः । न । वाजिनम् ।
देवम् । देवाः । अजनन् । सः । असि । उक्थ्यः ।। 5 ।।

मन्त्रार्थ- {हे इन्द्र ।} तुमने द्योतमान सूर्य के लिए गतिशील पृथ्वी को स्थिर करके देखने योग्य किया । जो तुमने गतिशील नदियों के मार्गों को खोला । हे अहिहन् इन्द्र । {उस प्रकार} हम स्तोता स्तोत्रों से वर्धित किये, जिस प्रकार जल से {धोकर} घोड़े वर्धित होते हैं । वह तू प्रशंसनीय है ।

मन्त्र - यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद्दुदोहिथ ।
सः शेवधिं नि दधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ।। 6।।

पदपाठ- यः । भोजनम् । च । दयसे । च । वर्धनम् । आर्द्रात् । आ । शुष्कम् । मधुऽमत् । दुदोहिथ ।
सः । शेवऽधिम् । नि । दधिषे । विवस्वति । विश्वस्य । एकः । ईशिषे । सः । असि । उक्थ्यः ।।

मन्त्रार्थ - {हे इन्द्र} जो तू यजमानों हेतु बृद्धिकारक धन एवं भोजन देता है तथा गीले वृक्षादि से सूखा मधुररसयुक्त {फल} उत्पन्न करता है, वह तू सेवा करने वाले यजमान के घर धन स्थापित करता है । समस्त जगत का अकेला ही स्वामी है, वह {तू} प्रशंसनीय है ।

मन्त्र - यः पुष्पिणीश्च प्रस्वश्च धर्मणाधि दाने व्यवनीरधारयः ।
यश्चासमा अजनो दिद्युतो दिव उरुर्वा अभितः सास्युक्थ्यः ।। 7 ।।

पदपाठ- यः। पुष्पिणीः। च। प्रऽस्वः। च। धर्मणा। अधि। दाने। वि। ... अवनीः। अधारयः। यः। च। असमाः। अजनः। दिद्युतः। दिवः।
उरुः। ऊर्वान्। अभितः। सः। असि। उक्थ्यः ।। 7 ।।

मन्त्रार्थ- (हे इन्द्र) जिसने खेत में पुष्पवती तथा फल उत्पन्न करने तथा संरक्षक औषधियों को उनके गुणों से युक्त करके विविध रूपों में प्रतिष्ठित किया, जिसने द्योतमान सूर्य की समानता रहित विविध गुण वाली किरणें उत्पन्न कीं और जिसने सब ओर फैले हुए महान् पर्वतों को उत्पन्न किया, वह (तू) प्रशंसनीय है ।

मन्त्र - यो नार्मरं सहवसुं निहन्तवे पृक्षाय च दासवेशाय चावहः ।
ऊर्जयन्त्या अपरिविष्टमास्यमुतैवाद्य पुरुकृत्सास्युक्थ्यः ।। 8 ।।

पदपाठ- यः। नार्मरम्। सहऽवसुम्। निऽहन्तवे। पृक्षाय। च। दासऽवेशाय। च। अवहः।
ऊर्जयन्त्याः। अपरिऽविष्टम्। आस्यम्।
उत। एव। अद्य। पुरुऽकृत्। सः। असि। उक्थ्यः ।। 8 ।।

मन्त्रार्थ- विविध कर्मों के सम्पादनकर्ता हे इन्द्र । जिस (तूने) धनसम्पन्न नार्मर को वध हेतु, अन्न लाभहेतु, दस्यु लोगों के विनाश हेतु (अपनी) तीक्ष्ण बलवती वज्र की धार के निर्मल मुख को आज ही उस असुर पर फेंका । वह (तू) प्रशंसनीय है ।

मन्त्र - शतं वा यस्य दश साकमाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ ।
अरज्जौ दस्यून्त्समुनब्दभीतये सुप्राव्यो अभवः सास्युक्थ्यः ।। 9 ।।

पदपाठ- शतम्।वा।यस्य।दश।साकम्।आ ।अद्यः ।एकस्य।श्रुष्टौ।यत्।ह।चोदम्।आविथ।
अरज्जौ ।दस्यून्।सम्।उनप्।दभीतये।सुप्रऽअव्यः।अभवः।सः।असि।उक्थ्यः।।

मन्त्रार्थ- {हे इन्द्र} जिस तूने एक बार सुख निमित्त दाता यजमान की रक्षा की, जिसके {रथ को} दश या सौ घोड़े एक साथ वहन करते हैं, जो तू सबका भोज्य है, जिसने दभीति ऋषि के लिए बिना रज्जु से बाँधे ही शत्रुओं को नष्ट कर दिया और उस दभीति नामक ऋषि का उत्तम साथी बना वह {तू} प्रशंसनीय है ।

मन्त्र - विश्वेदनु रोधना अस्य पौंस्यं ददुरस्मै दधिरे कृत्नवे धनम् ।
षळस्तभ्ना विष्टिरः पञ्च संदृशः परि परो अभवः सास्युक्थ्यः ।। 10 ।।

पदपाठ- विश्वा ।इत्।अनु।रोधनाः।अस्य।पौंस्यम्।ददुः ।अस्मै।दधिरे।कृत्नवे।धनम्।
षट्।अस्तभ्नाः।विऽस्तिरः।पञ्च।सम्ऽदृशः।परि।परः।अभवः।सः।असि।
उक्थ्यः।। 10 ।।

मन्त्रार्थ- समस्त नदियाँ ही इस {इन्द्र} के पराक्रमानुकूल चलती हैं । {अर्थात् उसका अनुशीलन करती हैं।} {यजमान} इसके लिए {हवि} प्रदान करते हैं, {उन्होंने इस} {क्रियावान्} के लिए धन एकत्र किया है। {हे इन्द्र ।} तूने छः {क} विस्तृत पदार्थों को नियमित किया है । {तू} पाँच प्रकार की सम्यक् दृष्टियुक्त प्रजा का सब ओर से पालक {सिद्ध} हुआ है । वह तू प्रशंसनीय है ।

मन्त्र – प्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विन्दसे वसु ।
जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युक्थ्यः ।। 11 ।।

पदपाठ– प्रवाचनम् । तव । वीर । वीर्यम् । यत् । एकेन । क्रतुना । विन्दसे । वसु ।
जातूऽस्थिरस्य । प्र । वयः । सहस्वतः । या । चकर्थ । सः । इन्द्र । विश्वा । असि । उक्थ्यः ।।

मन्त्रार्थ– हे बलवान इन्द्र ! जिस कारण तू एक ही बार के कर्म से (प्रयास से) (अभीष्ट) धन प्राप्त कर लेता है, (इस कारण) तेरा वह पराक्रम सुन्दर ढग से प्रशंसनीय है । (तू) बलवान जातूष्ठिर का अन्न स्वीकार करता है । हे इन्द्र ! तूने जिन समस्त श्रेष्ठ कर्मों को सम्पादित किया, वह (तू) प्रशंसनीय है ।

मन्त्र – अरमयः सरपसस्तराय कं तुर्वीतये च वय्याय च स्रुतिम् ।
नीचा सन्तमुदनयः परावृजं प्रान्धं श्रोणं श्रवयन्त्सास्युक्थ्यः ।। 12 ।।

पदपाठ– अरमयः । सरःऽअपसः । तराय । कम् । तुर्वीतये । च । वय्याय । च । स्रुतिम् ।
नीचा । सन्तम् । उत् । अनयः । पराऽवृजम् । प्र । अन्धम् । श्रोणम् । श्रवयन् । सः ।
असि । उक्थ्यः ।।

मन्त्रार्थ– (हे इन्द्र !) (तूने) तुर्वीति और वय्य को सुखपूर्वक जल से पार जाने हेतु जलों के प्रवाह को नियम में रखा । जल की गहराई में स्थित परावृक् ऋषि को जल से ऊपर किया । अपनी कीर्ति को बढ़ाते हुए तूने अन्धे एवं लड़खड़े (पड्गु) को आँख एवं पाँव दान किए, वह तू प्रशंसनीय है ।

मन्त्र - अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम् ।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः ।।

पदपाद- अस्मभ्यम् । तत् । वसो इति । दानाय। राधः । सम् । अर्थयस्व। बहु। ते।
वसव्यम् ।
इन्द्र। यत्। चित्रम्। श्रवस्याः । अनु। द्यून्। बृहत्। वदेम। विदथे। सुवीराः ।। ।3 ।।

मन्त्रार्थ - हे धनयुक्त इन्द्र । तेरे (पास) प्रभूतमात्रा में धन है, (तू) वह धन दान हेतु (भोग हेतु) हमें प्रदान करो, जो तेरा इच्छित धन है, उसे तू प्रतिदिन देने की इच्छा कर । (हम) उत्तम वीरों से युक्त होकर यज्ञ में बृहद् साम स्तुति का पाठ करें ।

"ऋग्वेद" द्वितीय मण्डल, सूक्त संख्या-14

मन्त्र- अध्वर्यवो भरतेन्द्राय सोममामत्रेभिः सिञ्चता मद्यमन्धः।
कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णेतदिदेष वष्टि॥

पदपाठ- अध्वर्यवः। भरत। इन्द्राय। सोमम्। आ।
अमत्रेभिः। सिञ्चत। मद्यम्। अन्धः।
कामी। हि। वीरः। सदम्। अस्य। पीतिम्।
जुहोत। वृष्णे। तत्। इत्। एषः। वष्टि।।

मन्त्रार्थ- हे अध्वर्यु लोगों। इन्द्र के लिए (प्रभूत मात्रा में) सोम प्रदान करो। पात्रों से इसके लिए मदकर अन्न प्रदान करो। वीर इन्द्र इस सोमपान के सर्वदा कामना करने वाला है। इस सुख की वर्षा करने वाले के लिए (सोम का) हवन करो। यह (इन्द्र) उसी (सोमद्रव्य) की कामना करता है।

मन्त्र- अध्वर्यवो यो अपो वव्रिवांसं वृत्रं जघानाशन्येव वृक्षम्।
तस्मा एतं भरत तद्वशायँ एष इन्द्रो अर्हति पीतिमस्य॥

पदपाठ- अध्वर्यवः। यः। अपः। वव्रिऽवांसम्। वृत्रम्। जघान। अशन्याऽइव। वृक्षम्।
तस्मै। एतम्। भरत। तत्ऽवशाय। एषः। इन्द्रः। अर्हति। पीतिम्। अस्य।।

मन्त्रार्थ- हे अध्वर्यु लोगों। जिस (इन्द्र) ने जैसे विद्युत (अग्नि) वृक्ष को जला देती है, वैसे ही जल को रोकने वाले वृत्र को मारा। (ऐसी) इच्छावाले उस (इन्द्र) के लिए यह (सोमरस) भर दो। यह इन्द्र इस (सोम को) पीने की योग्यता रखता है।

मन्त्र- अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः।
तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः।।

पदपाठ- अध्वर्यवः। यः। दृभीकम्। जघान। यः। गाः।
उत्ऽआजत्। अप। हि। वलम्। वरिति वः।
तस्मै। एतम्। अन्तरिक्षे। न। वातम्। इन्द्रम्। सोमैः।
आ। ऊर्णुत। जूः। न। वस्त्रैः।।

मन्त्रार्थ- हे अध्वर्यु लोगों। जिस (इन्द्र) ने दृभीक (नामक असुर) का वध किया, जिसने बलासुर के द्वारा निरुद्ध गाएं प्रकट कीं और बल नामक असुर को आवृत्त किया (बल के घेरे को तोड़ दिया)। जैसे आकाश में वायु को स्थिर करते हैं, वैसे उस इन्द्र के लिए यह सोम स्थापित करो। जैसे जीर्ण मनुष्य वस्त्रों से अपने अंगों को ढकता है, वैसे ही इन्द्र को सोम से आच्छादित करो।

मन्त्र- अध्वर्यवो य उरणं जघान नव चख्वांसं नवतिं च बाहून्।
यो अर्बुदमव नीचा बबाधे तमिन्द्रं सोमस्य भृथे हिनोत।।4।।

पदपाठ- अध्वर्यवः। यः। उरणम्। जघान। नव। चख्वांसम्।
नवतिम्। च। बाहून्। यः। अर्बुदम्। अव। नीचा।
बबाधे। तम्। इन्द्रम्। सोमस्य। भृथे। हिनोत।।

मन्त्रार्थ- हे अध्वर्यु लोगों, जिसने उरण को मारा, उसकी नौ आँखों और नब्बे भुजाओं को नष्ट किया, जिसने अर्बुद (नामक असुर) को नीचे करके गिरा दिया, उस इन्द्र को सोम के यज्ञ की ओर प्रेरित करो।

मन्त्र- अध्वर्यवो यः स्वश्नं जघान यः शुष्णमशुषं यो व्यंसम्।
यः पिप्रुं नमुचिं यो रुधिक्रां तस्मा इन्द्रायान्धसो जुहोत।।5।।

पदपाठ- अध्वर्यवः। यः। सु। अश्नम्। जघान। यः।
शुष्णम्। अशुषम्। यः। विऽअंसम्।
यः। पिप्रुम्। नमुचिम्। यः। रुधिऽक्राम्।
तस्मै। इन्द्राय। अन्धसः। जुहोत।

मन्त्रार्थ- हे अध्वर्यु लोगों ! जिस {इन्द्र} ने अश्न {नामक असुर} को मारा, जिसने न मरने योग्य किन्तु {दूसरों के प्राणशोषक} शुष्ण नामक असुर को {मारा}, जिसने अंसहीन करके {अहि को} मारा, जिसने पिप्रु को, नमुचि को और रुधिक्रा को मारा, उस इन्द्र के लिए हविर्लक्षणयुक्त अन्न का हवन करो।

मन्त्र- अध्वर्यवो यः शतं शम्बरस्य पुरो बिभेदाश्मनेव पूर्वीः।
यो वर्चिनः शतमिन्द्रः सहस्रमपावपद्भरता सोममस्मै।।6।।

पदपाठ- अध्वर्यवः। यः। शतम्। शम्बरस्य। पुरः।
बिभेद। अश्मनाऽइव। पूर्वीः।
यः। वर्चिनः। शतम्। इन्द्रः। सहस्रम्।
अपऽअवपत्। भरत। सोमम्। अस्मै।

मन्त्रार्थ- हे अध्वर्यु लोगों ! जिसने पत्थर सदृश कठोर वज्र से शम्बर {नामक मायावी असुर} के प्राचीन नगर को तोड़ दिया, जिस इन्द्र ने वर्ची {नामक असुर} के सैकड़ों, हजारों वीरों को एक साथ ही भूमि पर गिरा दिया, ऐसे {इन्द्र} के लिए सोम {प्रभूत मात्रा में} दो।

मन्त्र- अध्वर्यवो यः शतमा सहस्रं भूम्या उपस्थेऽवपज्जघन्वान्।
कुत्सस्यायोरतिथिग्वस्य वीरान्न्यावृणग्भरता सोममस्मै।।7।।

पदपाठ- अध्वर्यवः। यः। शतम्। आ। सहस्रम्। भूम्याः।
उपऽस्थे। अवपत्। जघन्वान्। कुत्सस्य।
आयोः। अतिथिऽग्वस्य। वीरान्।
नि। अवृणक्। भरत। सोमम्। अस्मै।

मन्त्रार्थ- हे अध्वर्यु लोगों ! जिस घातक ने भूमि के ऊपर सैकड़ो हजारों (असुरों) को मारकर चारों ओर गिरा दिया, जिसने कुत्स, आयु और अतिथिग्व के वीरों को नीचा दिखाया, ऐसे (इन्द्र) के लिए सोम (प्रभूत मात्रा में) दो।

मन्त्र- अध्वर्यवो यन्नरः कामयाध्वे श्रुष्टी वहन्तो नशथा तदिन्द्रे।
गभस्तिपूतं भरत श्रुतायेन्द्राय सोमं यज्यवो जुहोत।।8।।

पदपाठ- अध्वर्यवः। यत्। नरः। कामयाध्वे। श्रुष्टी। वहन्तः। नशथ।
तत्। इन्द्रे। गभस्तिऽपूतम्। भरत। श्रुताय। इन्द्राय।
सोमम्।यज्यवः। जुहोत।।

मन्त्रार्थ- हे नेता अध्वर्यु लोगों ! (तुम) जो कुछ कामना करो, इन्द्र के निमित्त शीघ्र हवि देते हुए उस (अभिलषित फल) को प्राप्त करो। याग करते हुए (हे अध्वर्यु लोगों) हाथों से मार्जन, दोहनादि से शुद्ध किये गए सोम को, प्रसिद्ध इन्द्र के लिए प्रभूत मात्रा में दो, (अर्थात् अग्नि में हवन करो।)।

मन्त्र- अध्वर्यव: कर्तना श्रुष्टिमस्मै वने निपूतं वन उन्नयध्वम्।
जुषाणो हस्त्यमभि वावशे व इन्द्राय सोमं मदिरं जुहोत।।9।।

पदपाठ- अध्वर्यव:। कर्तन। श्रुष्टिम्। अस्मै। वने। निऽपूतम्। वने।
उत्। नयध्वम्। जुषाण:। हस्त्यम्। अभि। वावशे। व:।
इन्द्राय। सोमम्। मदिरम्। जुहोत।।

मन्त्रार्थ- हे अध्वर्यु लोगों ! इस {इन्द्र} के {निमित्त} सुखकर सोमयज्ञ करो। लकड़ी के पात्र में रखे हुए, छान कर शुद्ध किए गए सोम को {इन्द्र के} आगे ले जाओ, सोम सेवन करने वाला {वह इन्द्र} तुम्हारे हाथ से अभिषुत सोम को {बहुत} चाहता है, {इसलिए} इन्द्र के लिए मदकर सोम का हवन करो।

मन्त्र- अध्वर्यव: पयसोधर्यथा गो: सोमेभिरीं पृणता भोजमिन्द्रम्।
वेदाहमस्य निभृतं म एतद्दित्सन्तं भूयो यजतश्चिकेत।।10।।

पदपाठ- अध्वर्यव:। पयसा। ऊध:। यथा। गो:। सोमेभि:। ईम्। पृणत।
भोजम्। इन्द्रम्। वेद। अहम्। अस्य। निऽभृतम्। मे। एतत्।
दित्सन्तम्। भूय:। यजत:। चिकेत।

मन्त्रार्थ- हे अध्वर्यु लोगों ! जिस प्रकार गाय का थन दूध से भरा रहता है, उसी प्रकार इस भोजनदाता इन्द्र को सोमरस से परिपूर्ण करो। मेरे इस सोम के गूढ़ सुख साधनस्वभाव को मैं ही जानता हूँ। यजनीय {इन्द्र} देने की इच्छा वाले {यजमान} को और अधिक देता है।

मन्त्र- अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा।
तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु।।11।।

पदपाठ- अध्वर्यवः। यः। दिव्यस्य। वस्वः। यः। पार्थिवस्य।
क्षम्यस्य। राजा। तम्। ऊर्दरम्। न। पृणत। यवेन।
इन्द्रम्। सोमेभिः। तत्। अपः। वः। अस्तु।

मन्त्रार्थ- हे अध्वर्यु लोगों ! जो {इन्द्र} द्युलोक में उत्पन्न, अन्तरिक्ष में उत्पन्न, और पृथ्वी पर उत्पन्न धन का स्वामी है, उस इन्द्र को जो आदि अन्न से जैसे कोठे भरे रखते हैं, वैसे उसे {इन्द्र को} सोम से परिपूर्ण करो। तुम्हारा वह {कार्य} सदा बना रहे।

मन्त्र- अस्मभ्यं तद्वसो दानाय राधः समर्थयस्व बहु ते वसव्यम्।
इन्द्र यच्चित्रं श्रवस्या अनु द्यून्बृहद्वदेम विदथे सुवीराः।।12।।

पदपाठ- अस्मभ्यम्। तत्। वसो इति। दानाय। राधः। सम्।
अर्धयस्व। बहु। ते। वसव्यम्। इन्द्र। यत्। चित्रम्।
श्रवस्याः। अनु। द्यून। बृहत्। वदेम। विदथे। सुऽवीराः।।

मन्त्रार्थ- हे धनसम्पन्न इन्द्र ! तेरे पास बहुत धन है। तू वह धन दान हेतु हमें दो। जो तेरा अभीष्ट धन है, उसे तू प्रतिदिन देने की इच्छा कर। हम उत्तम वीरों से युक्त होकर यज्ञ में तेरे सामने मंत्रों का अत्यधिक उच्चारण करें।

"ऋग्वेद" द्वितीय मण्डल, सूक्त संख्या-15

मन्त्र- प्र घान्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम्।
त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान।।1।।

पदपाठ- प्र। घ। नु। अस्य। महतः। महानि। सत्या। सत्यस्य।
करणानि। वोचम्। त्रिकद्रुकेषु। अपिबत्। सुतस्य।
अस्य। मदे। अहिम्। इन्द्रः। जघान।

मन्त्रार्थ- सत्यस्वरूप इस महान् इन्द्र के सर्वदा स्थिर महान् कर्मों को मैं प्रकृष्ट रूप से कहता हूँ। इन्द्र ने तीन पात्रों में सोम का पान किया। इस (सोम) के मद में अहि को मारा।

मन्त्र- अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम्।
स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार।।2।।

पदपाठ- अवंशे। द्याम्। अस्तभायत्। बृहन्तम्। आ। रोदसी इति।
अपृणत्। अन्तरिक्षम्। सः। धारयत्। पृथिवीम्। पप्रथत्।
च। सोमस्य। ता। मदे। इन्द्रः। चकार।।

मन्त्रार्थ- इन्द्र ने द्युलोक को बिना कारण अन्तरिक्ष में स्थिर किया। बढ़े हुए आकाश और द्यावापृथिवी को (अपनी सत्ता से) परिपूर्ण कर दिया। उस (इन्द्र) ने पृथिवी को धारण किया और उसे विस्तृत किया। इन्द्र ने ये (सब कर्म) सोम के मद में किया।

मन्त्र- सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम्।
वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार।।3।।

पदपाठ- सद्मऽइव। प्राचः। वि। मिमाय। मानैः। वज्रेण। खानि।
अतृणत्। नदीनाम्। वृथा। असृजत्। पथिऽभिः। दीर्घऽयाथैः।
सोमस्य। ता। मदे। इन्द्रः। चकार।

मन्त्रार्थ- इन्द्र ने माप तौल के अनुसार नदियों को यज्ञ गृह के समान पूर्व की ओर गतिमान बनाया। (अपने) वज्र से (उन) नदियों के मार्ग को खोदा। (उन्हें) दूर तक जाने योग्य मार्गों से सहज ही बहाया। इन्द्र ने ये (सब कर्म) सोम के मद में किया।

मन्त्र- स प्रवोळ्हॄन्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ।
सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार।।4।।

पदपाठ- सः। प्रऽवोळ्हॄन्। परिऽगत्य। दभीतेः। विश्वम्। अधाक्।
आयुधम्। इद्धे। अग्नौ। सम्। गोभिः। अश्वैः। असृजत्।
रथेभिः। सोमस्य। ता। मदे। इन्द्रः। चकार।

मन्त्रार्थ- उस (इन्द्र) ने दभीति के अपहर्ता असुरों को चारों ओर से घेर (उनके समस्त अस्त्र-शस्त्र प्रदीप्त हुई अग्नि में जला दिया उस दभीति नामक राजर्षि को) गायों, घोड़ों और रथों से संयुक्त किया। ये सब कर्म इन्द्र ने सोम के मद में किया।

- -

मन्त्र- स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति।
त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार।।5।।

पदपाठ- सः। ईम्। महीम्। धुनिम्। एतोः। अरम्णात्। सः। अस्नातॄन्।
अपारयत्। स्वस्ति। ते। उत्ऽस्नाय। रयिम्। अभि। प्र। तस्थुः।
सोमस्य। ता। मदे। इन्द्रः। चकार।

मन्त्रार्थ- उस इन्द्र ने इन (ऋषियों) को पार जाने हेतु इस महती नदी को
स्थिर किया। उसने पार जाने में असमर्थ लोगों को कुशलता पूर्वक
नदी के पार कर दिया। वे ऋषि लोग नदी को तैर कर धन की
ओर प्रस्थान किए। ये सब कर्म इन्द्र ने सोम के मद में किया।

मन्त्र- सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष।
अजवसो जविनीभिर्विवृश्चन्त्सोमस्य ता मद इन्द्रश्चकार।।6।।

पदपाठ- सः। उदञ्चम्। सिन्धुम्। अरिणात्। महि ऽत्वा। वज्रेण। अनः।
उषसः। सम्। पिपेष। अजवसः। जविनीभिः। विऽवृश्चन्। सोमस्य। ता।
मदे। इन्द्रः। चकार।।

मन्त्रार्थ- उस (इन्द्र) ने अपने महान् बल से नदी को उत्तर की ओर बहाया।
उषा (देवी) की शकट (गाड़ी) को वज्र से नष्ट किया। जवयुक्त
वेगवान् सेनाओं द्वारा निर्बल सेनाओं को विशेष प्रकार से नष्ट
किया। इन्द्र ने ये सब कर्म सोम के मद में किया।

- -

मन्त्र- स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक्।
प्रति श्रोणः स्थाद्व्य् नगचष्ट सोमस्य ता मद इन्द्रश्चकार।।7।।

पदपाठ- सः। विद्वान्। अपऽगोहम्। कनीनाम्। आविः। भवन्। उत्।
अतिष्ठत्। पराऽवृक्। प्रति। श्रोणः। स्थात्। वि। अनक्।
अचष्ट सोमस्य। ता। मदे। इन्द्रः। चकार।।

मन्त्रार्थ- वह परावृक् ऋषि सुन्दर स्त्रियों के तिरोहित होने के कारणों
को जानकर (इन्द्र की कृपा से) पुनः प्रत्यक्ष होता हुआ उनके
सम्मुख उपस्थित हुआ। पंगु (ऋषि पाँव पाकर के) उनके पास
गये, नेत्रहीन (ऋषि नेत्र पाकर के) पूर्णतया स्पष्ट देखने लगा।
ये (सब कर्म) इन्द्र ने सोम के मद में किया।

मन्त्र- भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत्।
रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार।।8।।

पदपाठ- भिनत्। वलम्। अंगिरऽभिः। गृणानः। वि। पर्वतस्य। दृंहितानि।
ऐरत्। रिणक्। रोधांसि। कृत्रिमाणि। एषाम्। सोमस्य। ता।
मदे। इन्द्रः। चकार।

मन्त्रार्थ- अंगिरा लोगों से प्रशंसित होकर (इन्द्र ने) बल को तोड़ दिया।
(तथा गायों के अवरोधक) पर्वत के सुदृढ़ द्वारों को खोल दिया।
इन पर्वतों के द्वारा कृत्रिम रूप निर्मित अवरोधक द्वारों को दूर
किया। इन्द्र ने ये (सब कर्म) सोम के मद में किया।

- -

मन्त्र- स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्रदभीतिमावः।
रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार।।9।।

पदपाठ- स्वप्नेन। अभिऽउप्य। चुमुरिम्। धुनिम्। च। जघन्थ। दस्युम्।
प्र। दभीतिम्। आवः। रम्भी। चित्। अत्र। विविदे। हिरण्यम्।
सोमस्य। ता। मदे। इन्द्रः। चकार।।

मन्त्रार्थ- {तुमने} दुष्ट चुमुरि और धुनि {नामक असुरों} को दीर्घनिद्रा से युक्त करके मार डाला {और} दभीति की रक्षा की। दण्डधारी ने धन {युद्ध में धन प्राप्त किया। इन्द्र ने ये {सब कर्म} सोम के मद में किया।

मन्त्र- नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः।।10।।

पदपाठ- नूनम्। सा। ते। प्रति। वरम्। जरित्रे। दुहीयत्। इन्द्र। दक्षिणा।
मघोनी। शिक्ष। स्तोतृऽभ्यः। मा। अति। धक्। भगः। नः।
बृहत्। वदेम। विदथे। सुऽवीराः।।

मन्त्रार्थ- हे इन्द्र! तेरी वह ऐश्वर्ययुक्त दक्षिणा निश्चय ही स्तोता हेतु श्रेष्ठ धन प्राप्त कराती है। ऐसी दक्षिणा {तुम} स्तोताओं हेतु दो। {किन्तु} हमें छोड़कर मत दो {अर्थात् धन वितरित करते समय हमारा त्याग न करो}। {तेरी कृपा से} हमें ऐश्वर्य प्राप्त होवे। अच्छे वीर युक्त स्तोता गण यज्ञ में {तेरे लिए} बड़ा स्तोत्र बोलें।

- -

"ऋग्वेद" पंचम मण्डल, सूक्त संख्या-40

मन्त्र- आ याह्यद्रिभिः सुतं सोमं सोमपते पिब।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम।। 1 ।।

पदपाठ- आ। याहि। अद्रिऽभिः। सुतम्। सोमम्। सोमऽपते।
पिब। वृषन्। इन्द्र। वृषऽभिः। वृत्रहन्ऽतम।।

मन्त्रार्थ- हे वृत्रहतक, बलवान् इन्द्र। तू घोड़ों से (इस यज्ञ में) आओ।
हे सोम के स्वामी इन्द्र। पत्थरों से कूट कर निचोड़े गए
(इस) सोमरस का पान करो।

नोट-(क) सायण ने इस मंत्र में 'वृषभिः' का तात्पर्य "वर्षकैर्मरुद्भिः सह"
मन्त्र-। किया। वहाँ अर्थ होगा "वर्षक मरुतों के साथ आओ।"

मन्त्र- वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम।।2।।

पदपाठ- वृषा। ग्रावा। वृषा। मदः। वृषा। सोमः। अयम्। सुतः।
वृषन्। इन्द्र। वृषऽभिः। वृत्रहन्ऽतम।।

मन्त्रार्थ- पत्थर मजबूत हैं, यह निचोड़ा गया सोम रस भी बलवर्धक है।
इसका मद (आनन्द) भी बलवर्धक है, अतः हे वृत्रहतक बलवान्
इन्द्र तू घोड़ों से आओ और सोमपान करो।

- -

मन्त्र- वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः।
वृषन्निन्द्र वृषभिर्वृत्रहन्तम।।3।।

पदपाठ- वृषा। त्वा। वृषणम्। हुवे। वज्रिन्। चित्राभिः। ऊतिऽभिः।
वृषन्। इन्द्र। वृषऽभिः। वृत्रहन्ऽतम।।

मन्त्रार्थ- हे वज्रयुक्त इन्द्र । मैं विविध रक्षा के उपायों से युक्त, तुझ बलवान् को पुकारता हूँ। हे सर्वाधिक वृत्रहन्तक इन्द्र । तू घोड़ों से आओ।

मन्त्र- ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यन्दिने सवने मत्सदिन्द्रः।।4।।

पदपाठ- ऋजीषी। वज्री। वृषभः। तुराषाट्। शुष्मी। राजा। वृत्रऽहा।
सोमऽपावा। युक्त्वा। हरिऽभ्याम्। उप। यासत्। अर्वाङ्।
माध्यंदिने। सवने। मत्सत्। इन्द्रः।

मन्त्रार्थ- सोम पास में रखने वाला, वज्रयुक्त, बलवान् शत्रुओं की शीघ्रता से नाश करने वाला, तेजस्वी, वृत्रहन्तक, सोम पान करने वाला इन्द्र घोड़ों को रथ में जोड़कर हमारे समीप आए और माध्यन्दिन सवन में आनन्दित होवे।

- -

मन्त्र- यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः।
अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः।।5।।

पदपाठ- यत्। त्वा। सूर्य। स्वःऽभानुः। तमसा। अविध्यत्। आसुरः।
अक्षेत्रऽवित्। यथा। मुग्धः। भुवनानि। अदीधयुः।।

मन्त्रार्थ- हे सूर्य !, जब तुमको स्वर्भानु नामक असुर ने {मायानिर्मित} अन्धकार से ढक लिया, {तब} जैसे अपने स्थान को न जानने वाला व्यक्ति मोहित हो जाता है, {भटक जाता है। उसी प्रकार समस्त लोक मोहित हो गए।

मन्त्र- स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्तमाना अवाहन्।
गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविन्ददत्रिः।।6।।

पदपाठ- स्वःऽभानोः। अध। यत्। इन्द्र। मायाः। अवः। दिवः।
वर्तमानाः। अवऽअहन्। गूळ्हम्। सूर्यम्। तमसा। अपऽव्रतेन।
तुरीयेण। ब्रह्मणा। अविन्दत्। अत्रिः।।

मन्त्रार्थ- हे इन्द्र ! इसके बाद जब {तुमने} स्वर्भानु असुर के द्युलोक के नीचे विद्यमान मायाओं को दूर किया। तब प्रकाश फैलाने वाले, अपगतकर्म से, अन्धकार से छिपे हुए सूर्य को अत्रि ने अत्यन्त श्रेष्ठ ज्ञान से प्राप्त किया।

- -

मन्त्र- मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत्।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा॥7॥

पदपाठ- मा। माम्। इमम्। तव। सन्तम्। अत्रे। इरस्या। द्रुग्धः।
भियसा। नि। गारीत्। त्वम्। मित्रः। असि। सत्यऽराधाः।
तौ। मा। इह। अवतम्। वरुणः। च। राजा।

मन्त्रार्थ- हे अत्रि ऋषि। तुम्हारे विद्यमान रहते द्रोह करने वाला, दुष्ट राक्षस, क्रोधासुर भय के कारण या क्षुधा (अन्न की इच्छा) से निगल न जाए? तू सत्यधन से युक्त मित्र है। तू तथा तेजस्वी वरुण दोनों मिलकर यहाँ मेरी रक्षा करो।

मन्त्र- ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत्॥8॥

पदपाठ- ग्राव्णः। ब्रह्मा। युयुजानः। सपर्यन्। कीरिणा। देवान्। नमसा।
उपऽशिक्षन्। अत्रिः। सूर्यस्य। दिवि। चक्षुः। आ। अधात्। स्वःऽभानोः।
अप। मायाः। अघुक्षत्॥

मन्त्रार्थ- ज्ञानवान् अत्रि ने पत्थरों को परस्पर संयुक्त करते हुए स्तोत्र से देवों की पूजा करते हुए, अन्न से या (नमस्कार से) उन देवों को प्रसन्न करते हुए द्युलोक में सूर्य के मण्डल को स्थापित किया। स्वर्भानु नामक असुर की माया के (अन्धकार के) आवरण को दूर किया।

- -

मन्त्र- यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः।
अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन्।।1।।

पदपाठ- यम्। वै। सूर्यम्। स्वः॑ऽभानुः। तमसा। अविध्यत्। आसुरः।
अत्रयः। तम्। अनु। अविन्दन्। नहि। अन्ये। अशक्नुवन्।।

मन्त्रार्थ- जिस सूर्य को ही स्वर्भानु ने अंधकार से ढक दिया था, उस सूर्य को अत्रियों ने प्राप्त किया। दूसरे उसे (सूर्य) को प्राप्त नहीं कर सके।

- -

"ऋग्वेद" मण्डल-6, सूक्त संख्या-44

मन्त्र- यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः।।1।।

पदपाठ- यः। रयिऽवः। रयिम्ऽतमः। यः। द्युम्नैः। द्युम्नवत्ऽतमः।
सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते मदः।

मन्त्रार्थ- हे धनवान् इन्द्र ! जो {सोम} अतिशय धनवान् है, जो द्योतमान यशों से अतिशय यशस्वी है, हे स्वधापति, इन्द्र, वह सोम अभिषुत होने पर तुम्हारे लिए मदकर है।

मन्त्र- यः शग्मस्तुविशग्म ते रायो दामा मतीनाम्।
सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः।।2।।

पदपाठ- यः। शग्मः। तुविऽशग्म। ते। रायः। दामा। मतीनाम्।
सोमः। सुतः। सः। इन्द्र। ते। अस्ति। स्वधाऽपते। मदः।।

मन्त्रार्थ- हे बहुसुखयुक्त इन्द्र ! जो सुखकर सोम तेरे स्तोतागण को धन ऐश्वर्य देने वाला है, हे स्वधापति इन्द्र ! वह सोम अभिषुत होने पर तुम्हारे लिए मदकर है।

- -

मन्त्र- येन॑ वृद्धो न शव॑सा तुरो न स्वाभि॑रूतिभि॑:।
सोम॑: सुत: स इ॑न्द्र तेऽस्ति॑ स्वधापते मद॑:।।3।।

पदपाठ- येन॑। वृद्ध:। न। शव॑सा। तुर:। न। स्वाभि॑:। ऊतिऽभि॑:।
सोम॑:। सुत:। स:। इन्द्र:। ते। अस्ति॑। स्वधाऽपते। मद:।।

मन्त्रार्थ- जिस के द्वारा (सोम पीने से) प्रवृद्ध होता हुआ अपनी संरक्षण शक्तियों से और अपनी सामर्थ्य से, शत्रुओं का शीघ्र नाश किया जाता है, हे स्वधापति इन्द्र ! वह सोम अभिषुत होने पर तेरे लिए मदकर है।

मन्त्र- त्वमु॑ वो अप्र॑हणं गृणीषे शव॑सस्पति॑म्।
इन्द्रं॑ विश्वासाहं॑ नरं॑ मंहि॑ष्ठं विश्वच॑र्षणिम्।।4।।

पदपाठ- त्यम्। ऊँ इति॑। व:। अप्र॑ऽहनम्। गृणीषे। शव॑स:। पति॑म्।
इन्द्रम्। विश्वऽसह॑म्। नर॑म्। मंहि॑ष्ठम्। विश्वऽच॑र्षणिम्।।

मन्त्रार्थ- हे ऋत्विग्यजमान लोगों ! तुम्हारे लिए सज्जनों पर प्रहार न करने वाले, (भक्तों के लिए अनुग्राहक) बल के पालक, समस्त शत्रुओं को अभिभूत करने वाले, नेता, महाबलम्, दानी, सर्वज्ञ उस इन्द्र की स्तुति करो।

- -

मन्त्र- यं वर्धयन्तीद्गिरः पतिं तुरस्य राधसः।
तमिन्न्वस्य रोदसी देवी शुष्मं सपर्यतः॥5॥

पदपाठ- यम्। वर्धयन्ति। इत्। गिरः। पतिम्। तुरस्य। राधसः।
तम्। इत्। नु। अस्य। रोदसी इति। देवी इति। शुष्मम्। सपर्यतः॥

मन्त्रार्थ- ये स्तुतियाँ (इन्द्र सम्बन्धी) जो बल को बढ़ाती हैं, हिंसक शत्रुओं के स्वामी, (शत्रु) धन को (छीनने वाले), इस इन्द्र के उसी शोषक बल की देवनशील द्यावापृथिवी शीघ्रता से सेवा करते हैं।

मन्त्र- तद्व उक्थस्य बर्हणेन्द्रायोपस्तृणीषणि।
विपो न यस्योतयो वि यद्रोहन्ति सक्षितः॥6॥

पदपाठ- तत्। वः। उक्थस्य। बर्हणा। इन्द्राय। उपऽस्तृणीषणि।
विपः। न। यस्य। ऊतयः। वि। यत्। रोहन्ति। सऽक्षितः॥

मन्त्रार्थ- हे स्तोता लोग, तुम्हारे स्तोत्रों की वह विस्तृत महिमा है, जो इन्द्र के समीप जाकर (उसके बल को) बढ़ाते हैं, जिस (इन्द्र की रक्षाएं मेधावियों की भाँति श्रेष्ठ होती हैं, जिसमें समान रूप से निवास करने वाली रक्षाएं बढ़ती रहती हैं।

- -

मन्त्र- अविदद्दक्षं मित्रो नवीयान्पपानो देवेभ्यो वस्यो अचैत्।
ससवान्त्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः॥7॥

पदपाठ- अविदत्। दक्षम्। मित्रः। नवीयान्। पपानः। देवेभ्यः।
वस्यः। अचैत्। ससवान्। स्तौलाभिः। धौतरीभिः। उरुष्या।
पायुः। अभवत्। सखिऽभ्यः॥

मन्त्रार्थ- उस इन्द्र ने (कर्मों में) समर्थ (यजमान) को जाना। मित्रभूत,
अत्यन्त नवीन, सोमरस पान करने वाला, स्तोताओं को
श्रेष्ठ धन देता है। (वह इन्द्र) अन्नयुक्त, प्रवृद्ध (शत्रुओं
को अपने तेज से) कँपाने वाला, (स्तोताओं का) मित्रों
का विशेष रक्षक होता है।

मन्त्र- ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन्।
दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः॥8॥

पदपाठ- ऋतस्य। पथि। वेधाः। अपायि। श्रिये। मनांसि। देवासः।
अक्रन्। दधानः। नाम। महः। वचःऽभिः। वपुः। दृशये।
वेन्यः। वि। आवरित्यावः॥

मन्त्रार्थ- ऋत के मार्ग में रहकर ज्ञानी ने (सोम) पिया (इन्द्र के)
मनों को प्रसन्न करने हेतु ऋत्विज् लोग (कर्म) करते हैं।
(वह इन्द्र) प्रसिद्ध, महान् (आत्मीय) शरीर धारण करता
हुआ, स्तुतियों से प्रशंसित होता हुआ दर्शनार्थ प्रकट होवे।

- -

मन्त्र- द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः।
वर्षीयो वयः कृणुहि शचीभिर्धनस्य सातावस्माँ अविड्ढि॥9॥

पदपाठ- द्युमत्ऽतमम्। दक्षम्। धेहि। अस्मे इति। सेध। जनानाम्।
पूर्वीः। अरातीः। वर्षीयः। वयः। कृणुहि। शचीभिः।
धनस्य। सातौ। अस्मान्। अविड्ढि॥

मन्त्रार्थ- (हे इन्द्र !) तेजस्वी बल हमें धारण कराओ। हम स्तोताओं के बहुत से शत्रुओं को (नाश करो) दूर करो। प्रवृद्ध अन्न अपनी प्रज्ञा से (हमें प्रदान) करो। धन के वितरण के समय हमारा संरक्षण करो।

मन्त्र- इन्द्र तुभ्यमिन्मघवन्नभूम वयं दात्रे हरिवो मा वि वेनः।
नकिरापिर्ददृशे मर्त्यत्रा किमङ्ग रध्रचोदनं त्वाहुः॥10॥

पदपाठ- इन्द्र। तुभ्यम्। इत्। मघऽवन्। अभूम। वयम्। दात्रे। हरिऽवः।
मा। वि। वेनः। नकिः। आपिः। ददृशे। मर्त्यऽत्रा। किम्। अङ्ग।
रध्रऽचोदनम्। त्वा। आहुः॥

मन्त्रार्थ- हे धनवान् इन्द्र ! तुझ दाता के पास हम होवें। या (तुम्हारे लिए ही हविप्रदान में (हम) उपस्थित रहें)। हे अश्वों के स्वामी, (हम से) प्रतिकूल मत होओ। मनुष्यों के बीच तुमसे भिन्न दूसरा कोई बन्धु नहीं दिखता। अतः हे प्रिय ! सब लोग तुमको धन का प्रेरक कहते हैं।

- -

मन्त्र- मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम।
पूर्वीष्ट इन्द्र निष्षिधो जनेषु जह्यसुष्वीन्प्र वृहापृणतः।।11।।

पदपाठ- मा। जस्वने। वृषभ। नः। ररीथाः। मा। ते। रेवतः।
सख्ये। रिषाम। पूर्वीः। ते। इन्द्र। निःऽसिधः। जनेषु।
जहि। असुस्वीन्। प्र। वृह। अपृणतः।

मन्त्रार्थ- हे बलवान् । हिंसक शत्रु को हमें मत देना । तुझ धनवान् की
मित्रता में हम हिंसित न हों। हे इन्द्र । तेरे बहुत से निवारक
मनुष्यों में रहे हैं, इसलिए उन शत्रुओं को मारो और कृपण का
नाश करो।

मन्त्र- उदभ्राणीव स्तनयन्नियर्तीन्द्रो राधांस्यश्व्यानि गव्या।
त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः।।12।।

पदपाठ- उत्। अभ्राणिऽइव। स्तनयन्। इयर्ति। इन्द्रः। राधांसि।
अश्व्यानि। गव्या। त्वम्। असि। प्रऽदिवः। कारुऽधायाः।
मा। त्वा। अदामानः। आ। दभन्। मघोनः।।

मन्त्रार्थ- मेघ जैसी गर्जन ध्वनि उत्पन्न करता है,वैसा ही इन्द्र (स्तोताओं
को देने हेतु) अश्व सम्बन्धी, गौ सम्बन्धी (दो प्रकार का) धन
उत्पन्न करता है। प्राचीन काल से तू स्तोताओं को धारण करने
वाले हो। धनवान् को कृपण (हविष् न देने वाले) हिंसित न करें।

- -

मन्त्र- अध्वर्यों वीर प्र महे सुतानामिन्द्राय भर स ह्यस्य राजा।
य: पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वावृधे गृणतामृषीणाम्।।3।।

पदपाठ- अध्वर्यो इति। वीर। प्र। महे। सुतानाम्। इन्द्राय। भर।
स:। हि। अस्य। राजा। य:। पूर्व्याभि:। उत। नूतनाभि:।
गी:ऽभि:। ववृधे। गृणताम्। ऋषीणाम्।।

मन्त्रार्थ- हे वीर अध्वर्यु! महान् इन्द्र के लिए निचोड़ा गया सोमरस प्रभूत मात्रा में दो। वह [इन्द्र] ही इस [सोम का] राजा है, जो पूर्वकालीन तथा नूतन [वर्तमान समय में की गई स्तुति] उपासक ऋषियों की स्तुति से वृद्धि को प्राप्त करता है।

मन्त्र- अस्य मदे पुरु वर्पांसि विद्वानिन्द्रो वृत्राण्यप्रती जघान।
तमु प्र होषि मधुमन्तमस्मै सोमं वीराय शिप्रिणे पिबध्यै।।4।।

पदपाठ- अस्य। मदे। पुरु। वर्पांसि। विद्वान्। इन्द्र:। वृत्राणि। अप्रति।
जघान। तम्। ऊँ इति। प्र। होषि। मधुऽमन्तम्। अस्मै। सोमम्।
वीराय। शिप्रिणे। पिबध्यै।।

मन्त्रार्थ- इस [सोम पान] से उत्साहित विद्वान् इन्द्र ने बहुत से ढके हुए शत्रुओं को, स्वयं न हारने वाला होकर मारा। मधुरतायुक्त उसी सोम को शोभन हनु वाले इस वीर को पीने हेतु दो।

- -

मन्त्र- पातो सुतमिन्द्रो अस्तु सोमं हन्ता वृत्रं वज्रेण मन्दसानः।
गन्ता यज्ञं परावतश्चिदच्छा वसुर्धीनामविता कारुधायाः।।15।।

पदपाठ- पातो। सुतम्। इन्द्रः। अस्तु। सोमम्। हन्ता। वृत्रम्। वज्रेण।
मन्दसानः। गन्ता। यज्ञम्। पराऽवतः चित्। अच्छ। वसुः।
धीनाम्। अविता। कारुऽधायाः।।

मन्त्रार्थ- यह इन्द्र सबको निवास स्थान देने वाला, ज्ञानी विद्वानों का
रक्षक, यजमानों का धारक, अभिषुत सोम का [योग्य] पान कर्ता
होवे। [उस सोम से उत्साहित] वज्र से छिपे हुए शत्रु का विनाशक
होवे। दूर देश से भी यज्ञ होने पर पहुँच जाता है।।

मन्त्र- इदं त्यत्पात्रमिन्द्रपानमिन्द्रस्य प्रियममृतमपायि।
मत्सद्यथा सौमनसाय देवं व्यस्मद्द्वेषो युयवद्व्यंहः।। [16]

पदपाठ- इदम्। त्यत्। पात्रम्। इन्द्रऽपानम्। इन्द्रस्य। प्रियम्। अमृतम्।
अपायि। मत्सत्। यथा। सौमनसाय। देवम्। वि। अस्मत्।
द्वेषः। युयवत्। वि। अंहः।।

मन्त्रार्थ- इन्द्र के पीने योग्य पात्र से, इन्द्र का प्रिय यह अमृत रस [इन्द्र]
पान करे। जिस प्रकार मन की प्रसन्नता के लिए देव इन्द्र को
आनन्द प्राप्त हो, उसी भाँति वह पान करे। द्वेष और पाप
भी हमसे दूर हो जायें।

- -

मन्त्र- एना मन्दानो जहि शूर शत्रूञ्जामिमजामिं मघवन्नमित्रान्।
अभिषेणाँ अभ्यादेदिशानान्पराच इन्द्र प्रमृणा जही च।। §17§

पदपाठ- एना। मन्दानः। जहि। शूर। शत्रून्। जामिम्। अजामिम्।
मघवन्। अमित्रान्। अभिऽसेनान्। अभि। आऽदेदिशानान्।
पराचः। इन्द्र। प्र। मृण। जहि। च।।

मन्त्रार्थ- हे धनवान्, शूरवीर इन्द्र ! इससे आनन्दित होकर ज्ञाति अज्ञाति §दोनों प्रकार§ के शत्रुओं को मारो। हमारी ओर आते हुए शस्त्रों को, §हमारे सामने से छोड़ने वाले§ शत्रुओं को हे इन्द्र ! दूर से ही मारो तथा उनका समूल नाश करो।

मन्त्र- आसुष्मा णो मघवन्निन्द्र पृत्स्वस्मभ्यं महि वरिवः सुगं कः।
अपां तोकस्य तनयस्य जेष इन्द्र सूरीन्कृणुहि स्मा नो अर्धम्।। §18§

पदपाठ- आसु। स्म। नः। मघऽवन्। इन्द्र। पृत्ऽसु। अस्मभ्यम्। महि।
वरिवः। सुऽगतम्। करितिकः। अपाम्। तोकस्य। तनयस्य।
जेषे। इन्द्र। सूरीन्। कृणुहि। स्म। नः। अर्धम्।।

मन्त्रार्थ- हे धनवान् इन्द्र ! हमें इन युद्धों में सरलता से प्राप्त होने वाला वरणीय धन दो। हे इन्द्र ! प्राप्तव्य धन पुत्र एवं पौत्र के जय हेतु हमें विद्वान और समृद्ध बनाओ।

- -

मन्त्र- आ त्वा हरयो वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः।
अस्मत्राञ्चो वृषणो वज्रवाहो वृष्णे मदाय सुयुजो वहन्तु।। §19§

पदपाठ- आ। त्वा। हरयः। वृषणः। युजानाः। वृषऽरथासः। वृषऽरश्मयः। अत्याः। अस्मत्राञ्चः। वृषणः। वज्रऽवाहः। वृष्णे। मदाय। सुऽयुजः। वहन्तु।।

मन्त्रार्थ- §हे इन्द्र§ तुझे बलवान्, §स्वयं ही§ रथ में जुड़ने वाले बलवान् रथ के साथ रहने वाले वृषरश्मियुक्त, सतत चलने वाले हमारे समीप आने वाले, वीरतायुक्त वज्र की भाँति तीक्ष्ण बाहु वाले, सुन्दर ढंग से जुते हुए घोड़े बल वर्धक मद §पान§ हेतु ले आएं।

मन्त्र- आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदन्तः।
इन्द्र प्र तुभ्यं वृषभिः सुतानां वृष्णे भरन्ति वृषभाय सोमम्।। §20§

पदपाठ- आ। ते। वृषन्। वृषणः। द्रोणम्। अस्थुः। घृतऽप्रुषः। न। ऊर्मयः। मदन्तः। इन्द्र। प्र। तुभ्यम्। वृषऽभिः। सुतानाम्। वृष्णे। भरन्ति। वृषभाय। सोमम्।।

मन्त्रार्थ- हे सामर्थ्यवान् वीर इन्द्र ! जल से मिश्रित समुद्री तरंगों की भाँति आनन्दित करने वाले §ये रस§ तेरे पात्र में स्थित हैं। हे इन्द्र ! समर्थ बलवान् तुम्हारे लिए पत्थरों से कूटकर निकाला गया सोमरस प्रभूत मात्रा में देते हैं।

- -

मन्त्र- वृषासि दिवो वृषभ: पृथिव्या वृषा सिन्धूनां वृषभ: स्तियानाम्।
वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय।। §21§

पदपाठ- वृषा। असि। दिव:। वृषभ:। पृथिव्या। वृषा। सिन्धूनाम्।
वृषभ:। स्तियानाम्। वृष्णे। ते। इन्दु:। वृषभ। पीपाय।
स्वादु:। रस:। मधुऽपेय:। वराय।।

मन्त्रार्थ- §हे इन्द्र तु§ द्युलोक का §बलवान्§ वीर है। पृथिवी का बलवान् आधार है, स्यन्दशील नदियों का वर्षा द्वारा पूरक है। सँघीभूत स्थावर जंगम प्राणियों का उत्पादक है। हे वृषभ इन्द्र । श्रेष्ठ वीरवान् तुम्हारे लिए स्वादिष्ट मधुरतायुक्त पीने योग्य सोमरस तैयार हो रहा है §इसको§ पीयो।

मन्त्र- अयं देव: सहसा जायमान इन्द्रेण युजा पणिमस्तभायत्।
अयं स्वस्य पितुरायुधानीन्दुरमुष्णादशिवस्य मायाः।। §22§

पदपाठ- अयम्। देव:। सहसा।।जायमान:। इन्द्रेण। युजा। पणिम्।
अस्तभायत्। अयम्। स्वस्य। पितु:। आयुधानि। इन्दु:।
अमुष्णात्। अशिवस्य। मायाः।।

मन्त्रार्थ- द्योतमान इस सोम ने इन्द्र के साथ पैदा होते हुए पणि असुर को बल से रोका। अपने गौरूप धन के पालयिता अशुभ शत्रु के आयुध एवं कुटिल योजनाओं को चुरा लिया।

- -

मन्त्र- अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरन्तः।
अयं त्रिधातु दिवि रोचनेषु त्रितेषु विन्ददमृतं निगूळहम्।। ॥23॥

पदपाठ- अयम्। अकृणोत्। उषसः। सुऽपत्नीः। अयम्। सूर्ये। अदधात्।
ज्योतिः। अन्तरिति। अयम्। त्रिऽधातु। दिवि। रोचनेषु।
त्रितेषु। विन्दत। अमृतम्। निऽगूळहम्।

मन्त्रार्थ- इस ॥सोम॥ ने उषाकालों को शोभनपति ॥सूर्य॥ से युक्त किया। इसी ने सूर्य मण्डल के मध्य में तेज को रखा। तीन प्रकार की धारक शक्तियों से युक्त यह द्युलोक में तीनों प्रकाशमान स्थानों में अदृश्य ॥रहस्यमय ढंग से छिपे हुए अमृत को प्राप्त करता है।

मन्त्र- अयं द्यावापृथिवी विष्कभायदयं रथमयुनक्सप्तरश्मिम्।
अयं गोषु शच्या पक्वमन्तः सोमो दाधार दशयन्त्रमुत्सम्।। ॥24॥

पदपाठ- अयम्। द्यावापृथिवी इति। वि। स्कभायत्। अयम्। रथम्।
अयुनक्। सप्तऽरश्मिम्। अयम्। गोषु। शच्या। पक्वम्। अन्तरिति।
सोमः। दाधार। दशऽयन्त्रम्। उत्सम्।

मन्त्रार्थ- इसी ने द्यावापृथिवी को स्थिर किया है। इसी ने सूर्य के रथ को सप्त किरणों से युक्त किया। इस सोम ने ही गायों के थन में पके दूध को शक्तियुक्त करके धारण कराया, जो दश ग्राहों वाले सोम प्रवाह को धारण किया।

- -

"ऋग्वेद" सप्तम मण्डल

मन्त्र- अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्।
सखा सुशेव एधि नः।। §1§

पदपाठ- अमीवऽहा। वास्तोः। पते। विश्वा। रूपाण्याविशन्।
सखा। सुशेवः। एधि। नः।। §।§

मन्त्रार्थ- हे वास्तु के देवता, अमीवा के विनाशक के रूप में अनेक रूपों में §देवगण§ प्रविष्ट हो गए। हमारे सुकर सखा बन जाओ।

मन्त्र- यदर्जुन सारमेय दतः पिशंग यच्छसे।
वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप।। §2§

पदपाठ- यत्। अर्जुन। सारमेय। दतः। पिशंग। यच्छसे।
विऽइव। भ्राजन्ते। ऋष्टयः। उप। स्रक्वेषु। बप्सतः। नि। सु। स्वप।।

मन्त्रार्थ- हे श्वेत एवं किंचित् श्वेत वर्ण §पिशंग वर्ण§ वाले सरमा के पुत्र §तुम§ जब §हमें काटने हेतु§ दाँतों को खोलते हो, तब §हमारे§ समीप से काटने वाले §तुम्हारे दाँत§ आयुध की भाँति विशेष रूप से §वे§ जबड़ों में चमकते हैं। §ऐसा तू अब§ अच्छी तरह सो जा।

- -

मन्त्र- स्तेनं राय सारमेय तस्करं वा पुनःसर।
स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप।। §3§

पदपाठ- स्तेनम्। राय। सारमेय। तस्करम्। वा। पुनःऽसर।
स्तोतॄन्। इन्द्रस्य। रायसि। किम्। अस्मान्। दुच्छुनऽयसे। नि। सु। स्वप।

मन्त्रार्थ- जिस स्थान में एक बार जाते हैं, उसी स्थान में पुनः-पुनः जाने वाले हे पुत्र। §प्रत्यक्षधन का अपहरण करने वाले§ तस्कर पर दौड़। इन्द्र के स्तोताओं पर क्यों दौड़ता है ? हमें क्यों बाँधता है ? §ऐसा तू अब§ अच्छी तरह सो जा।

मन्त्र- त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः।
स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप।। §4§

पदपाठ- त्वम्। सूकरस्य। दर्दृहि। तव। दर्दर्तु। सूकरः। स्तोतॄन्। इन्द्रस्य।
रायसि। किम्। अस्मान्। दुच्छुनऽयसे। नि। सु। स्वप।

मन्त्रार्थ- §हेसारमेय§ तू सुअर को फाड़। सुअर भी तुझ पर आक्रमण करे। तू इन्द्र के स्तोताओं पर क्यों दौड़ता है ? हमें क्यों बाँधता है ? §ऐसा तू अब§ अच्छी तरह सो जा।

- -

मन्त्र- सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।
ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः।। (5)

पदपाठ- सस्तु। माता। सस्तु। पिता। सस्तु। श्वा। सस्तु। विश्पतिः।
ससन्तु। सर्वे। ज्ञातयः। सस्तु। अयम्। अभितः। [illegible] जनः।।

मन्त्रार्थ- (हे सारमेय !) (तुम्हारी) जननी सो जाये, और पिता भी सो जाये, कुत्ता सोवे तथा प्रजापालक (भी) सो जाये। समस्त बन्धु-बान्धव सो जाएं। चारों तरफ से सब लोग सो जाएं।

मन्त्र- य आस्ते यश्च चरति यश्च पश्यति नो जनः।
तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा।। (6)

पदपाठ- यः। आस्ते। यः। च। चरति। यः। च। पश्यति। नः। जनः।
तेषाम्। सम्। हन्मः। अक्षाणि। यथा। इदम्। हर्म्यम्। तथा।।

मन्त्रार्थ- जो (मनुष्य इस प्रदेश में) बैठता है और जो जाता है, जो मनुष्य हमें देखता है, उनके आँखों को हम एक केन्द्र में लाते हैं। इस राजप्रसाद के सदृश (उनकी आँखें एक केन्द्र में स्थिर) हों।

- -

मन्त्र- सहस्रशृंगो वृषभो यः समुद्रादुदाचरत्।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि।। §7§

पदपाठ- सहस्रऽशृंगः। वृषभः। यः। समुद्रात्। उत्ऽआचरत्।
तेन। सहस्येन। वयम्। नि। जनान्। स्वापयामसि।।

मन्त्रार्थ- सहस्रों किरणों से युक्त जो बलवान् या §वृष्टि करने वाला§ वृषभ है, वह समुद्र से ऊपर आया है, उस शत्रु को पराजित करने वाले सूर्य §के बल§ से हम सब लोगों को सुला देते हैं।

मन्त्र- प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः।
स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि।। §8§

पदपाठ- प्रोष्ठेऽशयाः। वह्येऽशयाः। नारीः। याः। तल्पऽशीवरीः।
स्त्रियः। याः। पुण्यऽगन्धाः। ताः। सर्वाः। स्वापयामसि।।

मन्त्रार्थ- जो आँगन में सोती हैं, जो वाहनों में सोती हैं, जो स्त्रियाँ बिस्तरों पर सोती हैं, जो उत्तम गन्धवाली स्त्रियाँ हैं, उन सब स्त्रियों को §हम§ सुलाते हैं।

- -

"ऋग्वेद" अष्टम मण्डल, सूक्त संख्या-12

मन्त्र- य इन्द्र सोमपातमो मदः शविष्ठ चेतति।
येना हंसि न्यत्रिणं तमीमहे।। ‖1‖

पदपाठ- यः। इन्द्र। सोमऽपातमः। मदः। शविष्ठ। चेतति।
येन। हंसि। नि। अत्रिणम्। तम्। ईमहे।।

मन्त्रार्थ- हे इन्द्र ! जो तुम अतिशय सोम पीने वाले, बलवान् तथा वृत्रवधादि कर्म को जानने वाले सोम पानजनित मद में आनन्दित होने वाले, तथा उसी मद से राक्षसादि को निकृष्ट रूप से हिंसित करने वाले हो, ‖ऐसे‖ तुमको हम लोग माँगते हैं।

मन्त्र- येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम्।
येना समुद्रमाविथा तमीमहे।। ‖2‖

पदपाठ- येन। दशऽग्वम्। अध्रिऽगुम्। वेपयन्तम्। स्वःऽनरम्।
येन। समुद्रम्। आविथ। तम्। ईमहे।।

मन्त्रार्थ- हे इन्द्र ! जिस ‖सोमपानजनित मद से‖ दशग्व तथा अध्रिगु ऋषि ‖भय से‖ काँपते हुए यजमान की रक्षा की और जिस ‖बल‖ से समुद्र की रक्षा की थी, उस ‖बल‖ को ‖हम‖ माँगते हैं।

मन्त्र- येन सिन्धुं महीरपो रथाँइव प्रचोदयः।
पन्थामृतस्य यातवे तमीमहे।। ‖3‖

पदपाठ- येन। सिन्धुम्। मही:। अप:। रथान्ऽइव। प्रऽचोदयः
पन्थाम्। ऋतस्य। यातवे। तम्। ईमहे।।

मन्त्रार्थ- (हे इन्द्र ।) जिस (सोमपानजन्य मद) से रथों के समान बड़े-बड़े प्रवाहों को समुद्र की ओर प्रेरित किया, ऋत के मार्ग पर जाने हेतु (हम) उस (मद) को माँगते हैं।

मन्त्र- इमं स्तोममभिष्टये घृतं न पूतमद्रिवः।
येना नु सद्य ओजसा ववक्षिथ।। (4)

पदपाठ- इमम्। स्तोमम्। अभिष्टये। घृतम्। न। पूतम्। अद्रिऽवः।
येन। नु। सद्यः। ओजसा। ववक्षिथ।।

मन्त्रार्थ- वज्र धारण करने वाले इन्द्र । घृत की भाँति पवित्र इस स्तोम (स्तुति) को अभिष्ट की प्राप्ति तथा धनादि लाभ हेतु (सुनो)। जिससे (तुम) आत्मीय बल से युक्त होकर शीघ्र ही (अभिलषित धन को) दे सकते हो।

मन्त्र- इमं जुषस्व गिर्वणः समुद्रइव पिन्वते।
इन्द्र विश्वाभिरूतिभिर्ववक्षिथ।। (5)

पदपाठ- इमम्। जुषस्व। गिर्वणः। समुद्रःऽइव। पिन्वते।
इन्द्र। विश्वाभिः। ऊतिऽभिः। ववक्षिथ।

- -

मन्त्रार्थ- हे स्तुतियों के द्वारा सेवनीय इन्द्र ! इस (मेरे द्वारा रचित स्तोम) का सेवन करो। समुद्र की भाँति बढ़ने वाले तुम समस्त सुरक्षाओं के साथ हमारा संरक्षण करते हो।

मन्त्र- यो नो देव: परावत: सखित्वनाय मामहे।
दिवो न वृष्टिं प्रथयन्ववक्षिथ। (6)

पदपाठ- य:।न:।देव:।पराऽवत:।सखिऽत्वनाय।ममहे।
दिव:।न।वृष्टिम्।प्रथयन्।ववक्षिथ।।

मन्त्रार्थ- जो देव दूर देश (द्युलोक) से आकर, हमारी मित्रता हेतु धनों को देता है; ऐसे तुम हे इन्द्र, जैसे द्युलोक से वर्षा को (फैलाते हो) वैसे ही (हमारे धनों को) फैलाते हुए (तुम) हमारे पास पहुँचते हो।

मन्त्र- ववक्षुरस्य केतव उत वज्रो गभस्त्यो:।
यत्सूर्यो न रोदसी अवर्धयत्।। (7)

पदपाठ- ववक्षु:।अस्य।केतव:।उत।वज्र:।गभस्त्यो:।
यत्।सूर्य:।न।रोदसी इति।अवर्धयत्।।

मन्त्रार्थ- यह (इन्द्र) सूर्य (सबके प्रेरक आदित्य) की भाँति द्यावापृथिवी को बढ़ाता है, तब इसके रथ की पताका फैलती है या हमारा स्तुति सम्बन्धी प्रज्ञान विस्तृत होता है। (इन्द्र के) हाथों में वज्र भी है।

- -

मन्त्र- यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः।
आदित्त इन्द्रियं महि प्र वावृधे।। ॥4॥

पदपाठ- यदि। प्रऽवृद्ध। सत्ऽपते। सहस्रम्। महिषान्। अघः।
आत्। इत्। ते। इन्द्रियम्। महि। प्र। ववृधे।।

मन्त्रार्थ- हे प्रवृद्ध एवं सज्जनों के पालक इन्द्र। जब तुमने हजारों महान् असुरों का वध किया, उसके बाद ही तुम्हारा बल अत्यधिक बढ़ा।

मन्त्र- इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति।
अग्निर्वनेव सासहिः प्र वावृधे।। ॥9॥

पदपाठ- इन्द्रः। सूर्यस्य। रश्मिऽभिः। नि। अर्शसानम्। ओषति।
अग्निः। वनाऽइव। ससहिः। प्र। ववृधे।।

मन्त्रार्थ- यह इन्द्र सूर्य की किरणों से त्रासदायक शत्रु को जैसे अग्नि ॥दावानल॥ वनों को जला डालती है, वैसे ही विशेष रूप से जला डालता है ॥और॥ शत्रु को पराजित करने वाला वह इन्द्र प्रकृष्ट रूप से बढ़ता है।

मन्त्र- इयं त ऋत्वियावती धीतिरेति नवीयसी।
सपर्यन्ती पुरुप्रिया मिमीत इत्।। ॥10॥

पदपाठ- इयम्। ते। ऋत्वियऽवती। धीतिः। एति। नवीयसी।
सपर्यन्ती। पुरुऽप्रिया। मिमीते। इत्।।

- -

मन्त्रार्थ- §हे इन्द्र !§ यह §मेरे द्वारा रचित वसन्तादि काल में अनुष्ठेय§ यज्ञ कर्म में अतिशय नवीन स्तुति, बहुतों को प्रिय §स्तुति§ तेरे पास जाती है और तेरे गुणों का वर्णन करती है।

मन्त्र- गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक्।
स्तोमैरिन्द्रस्य वावृधे मिमीत इव।। §11§

पदपाठ- गर्भः। यज्ञस्य। देवऽयुः। क्रतुम्। पुनीते। आनुषक्।
स्तोमैः। इन्द्रस्य। ववृधे। मिमीते। इव।।

मन्त्रार्थ- यज्ञ के गर्भ का अनुष्ठान करने वाला, देवों की प्राप्ति की इच्छा करने वाला §ऋत्विज्§ निरन्तर क्रम से पवित्र रीति से प्रज्ञापक सोम को शोधित करता रहता है। इन्द्र §विषयक§ स्तुति से बढ़ता रहता है §एवं§ इन्द्र के गुणों का वर्णन करता रहता है।

मन्त्र- सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये।
प्राची वाशीव सुन्वते मिमीत इव।। §12§

पदपाठ- सनिः। मित्रस्य। पप्रथे। इन्द्रः। सोमस्य। पीतये।
प्राची। वाशीऽइव। सुन्वते। मिमीते इव।।

मन्त्रार्थ- मित्र §स्तोता§ को धन देने वाला इन्द्र सोमपानार्थ, सोमयाग करने वाले यजमान की श्रेष्ठ स्तुति को सुनने से विस्तीर्ण होता है और विस्तीर्ण होने पर इन्द्र का महात्म्य वर्णित होता है।

- -

मन्त्र- यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः।
घृतं न पिप्य आसन्यृतस्य यत्।। §13§

पदपाठ- यम्। विप्राः।उक्थऽवाहसः।अभिऽप्रमन्दुः।आयवः।
घृतम्।न।पिप्ये।आसनि।ऋतस्य।यत्।।

मन्त्रार्थ- ज्ञानी एवं स्तुतिकर्ता मनुष्य जिस §इन्द्र§ को आनन्दित करते हैं,उसके मुख में यज्ञ का जो द्रव्य §सोमरस§ है,उसे घी समान पिलाते हैं।

मन्त्र- उत स्वराजे अदितिः स्तोममिन्द्राय जीजनत्।
पुरुप्रशस्तमूतय ऋतस्य यत्।। §14§

पदपाठ- उत। स्वऽराजे। अदितिः। स्तोमम्। इन्द्राय। जीजनत्।
पुरुऽप्रशस्तम्।ऊतये।ऋतस्य।यत्।।

मन्त्रार्थ- और अखण्डनीय स्तोता ने स्वयं प्रकाशमान इन्द्र के लिए संरक्षण हेतु यज्ञ का जो बहुतों के द्वारा प्रशंसनीय स्तोत्र है, §उसे§ बनाया है।

मन्त्र- अभि वह्नय ऊतयेऽनूषत प्रशस्तये।
न देव विव्रता हरी ऋतस्य यत्।। §15§

पदपाठ- अभि।वह्नयः।ऊतये।अनूषत।प्रऽशस्तये।
न।देव।विऽव्रता।हरी इति।ऋतस्य।यत्।।

- -

मन्त्रार्थ- ऋत्विक् लोग रक्षणार्थ एवं प्रशंसा हेतु §इन्द्र की§ स्तुति करते हैं। हे दानादिगुणयुक्त इन्द्र । विविध कर्म संपादित करने वाले §तेरे§ घोड़े यज्ञ का जो §स्थान§है; उसकी तरफ §तुझे§ ले आवें।

मन्त्र- यत्सोममिन्द्र विष्णवि यद्वाघ त्रित आप्त्ये।
यद्वा मरुत्सु मन्दसे समिन्दुभिः।। §16§

पदपाठ- यत्।सोमम्।इन्द्र।विष्णवि।यत्।वा।घ।त्रिते।आप्त्ये।
यत्।वा।मरुत्ऽसु।मन्दसे।सम्।इन्दुऽभिः।।

मन्त्रार्थ- हे इन्द्र । यज्ञ में जिस सोम को पीकर आनन्दित होते हो और जिसको त्रित और आप्त्य नामक राजर्षि यजमान के §यज्ञ में§ पीते हो, जिसे मरुतों में पीते हो, उसी प्रकार हमारे सोमरस से भी सम्यक् रूप से आनन्दित होवो।

मन्त्र- यद्वा शक्र परावति समुद्रे अधि मन्दसे।
अस्माकमित्सुते रणा समिन्दुभिः।। §17§

पदपाठ- यत्।वा।शक्र।पराऽवति।समुद्रे।अधि।मन्दसे।
अस्माकम्।इत्।सुते।रण।सम्।इन्दुऽभिः।।

मन्त्रार्थ- हे शक्र §इन्द्र ।§ जिस प्रकार दूर देश में बहने वाले सोम में आनन्दित होते हो, उसी प्रकार हमारे सोम याग में भी सोमरस द्वारा सम्यक् रूप से आनन्दित होवो।

- -

मन्त्र- यद्वासि सुन्वतो वृधो यजमानस्य सत्पते।
उक्थे वा यस्य रण्यसि समिन्दुभिः।। §18§

पदपाठ- यत्।वा।असि।सुन्वतः।वृधः।यजमानस्य।सत्ऽपते।
उक्थे।वा।यस्य।रण्यसि।सम्।इन्दुऽभिः।।

मन्त्रार्थ- हे सज्जनों के पालक इन्द्र । जिस प्रकार सोम का अभिषव करते हुए यजमान को वर्धित करते हो, यजमान के यज्ञ में प्रशंसित होने पर आनन्दित होते हो, उसी प्रकार हमारे सोमरस से भी सम्यक् रूप से आनन्दित होओ

मन्त्र- देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि।
अधा यज्ञाय तुर्वणे व्यानशुः।। §19§

पदपाठ- देवम्ऽदेवम्।वः।अवसे।इन्द्रम्ऽइन्द्रम्।गृणीषणि।
अध।यज्ञाय।तुर्वणे।वि।आनशुः।।

मन्त्रार्थ- §हे ऋत्विक् ।§ तुम सबकी रक्षा हेतु देव §दानादिगुणयुक्त§ इन्द्र की §मैं§ स्तुति करता हूँ। इसके बाद शत्रु को मारने हेतु एवं यज्ञ के लिए मेरी वे स्तुतियाँ व्याप्त होवें।

मन्त्र- यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम्।
होत्राभिरिन्द्रं वावृधुर्व्यानशुः।। §20§

पदपाठ- यज्ञेभिः।यज्ञऽवाहसम्।सोमेभिः।सोमऽपातमम्।
होत्राभिः। इन्द्रम्।ववृधुः।वि।आनशुः।।

- -

मन्त्रार्थ- यज्ञ में बुलाने योग्य, अतिशय सोमपान करने वाले इन्द्र को यज्ञों से, सोम से, स्तुतियों से {स्तोता} बढ़ाते हैं, तथा इन्द्र को व्याप्त करते हैं।

मन्त्र- मुहीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः।
विश्वा वसूनि दाशुषे व्यानशुः।। {21}

पदपाठ- मुहीः। अस्य। प्रऽनीतयः। पूर्वीः। उत। प्रऽशस्तयः।
विश्वा। वसूनि। दाशुषे। वि। आनशुः।।

मन्त्रार्थ- इस {इन्द्र} की प्रणीतियाँ महान् हैं और {इसकी} प्रशंसनीय कीर्तियाँ पूर्व काल से चली आयी हैं। इसका सम्पूर्ण धन दाता {चरु पुरोडाश आदि देने वाले यजमान} के लिये प्राप्त होता है।

मन्त्र- इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः।
इन्द्रं वाणीरनूषता समोजसे।। {22}

पदपाठ- इन्द्रम्। वृत्राय। हन्तवे। देवासः। दधिरे। पुरः।
इन्द्रम्। वाणीः। अनूषत। सम्। ओजसे।।

मन्त्रार्थ- देवताओं ने वृत्र के मारने हेतु {इस} इन्द्र को आगे किया। अतः {इन्द्र के} ओज के लिए स्तुतिरूप वाणियाँ इसी की स्तुति करती हैं।

मन्त्र- मुहान्तं महिना वयं स्तोमेभिर्हवनश्रुतम्।
अर्कैरभि प्र णोनुमः समोजसे।। {23}

- -

पदपाठ- मुहा न्तम्। मुहिना। वयम्। स्तोमेभिः। हुवनऽश्रुतम्।
अर्कैः। अभि। प्र। नोनुमः। सम्। ओजसे।।

मन्त्रार्थ- अपनी महिमा से सबसे अधिक महान्, प्रार्थना को सुनने वाले, इन्द्र का
§अर्चन साधन भूत§ शस्त्रों से, स्तोत्रों से ओज के लिए प्रमुखरूपसेबार-बार
स्तुति करते हैं।

मन्त्र- न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम्।
अमादिदस्य तित्विषे समोजसः।। §24§

पदपाठ- न। यम्। विविक्तः। रोदसी इति। न। अन्तरिक्षाणि। वज्रिणम्।
अमात्। इत्। अस्य। तित्विषे। सम्। ओजसः।।

मन्त्रार्थ- जिस वज्रधारी इन्द्र को, द्यावापृथिवी अपने पास से पृथक् नहीं कर सकते,
अन्तरिक्ष लोक भी §जिसे§ पृथक् नहीं कर सके, ऐसे इस §इन्द्र§ के बल
तथा ओज से ही §समस्त जगत§ प्रकाशित हो रहा है।

मन्त्र- यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः।
आदित्ते हर्यता हरी ववक्षतुः।। §25§

पदपाठ- यत्। इन्द्र। पृतनाज्ये। देवाः। त्वा। दधिरे। पुरः।
आत्। इत्। ते । हर्यता। हरी इति। ववक्षतुः।।

मन्त्रार्थ- हे इन्द्र ! संग्राम में जब देवों ने तुझे §वृत्रवध के लिए§ आगे किया। उसके
बाद ही दो तेजस्वी घोड़े तुझे ले गए।

- -

मन्त्र- यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः।
आदित्ते हर्यता हरी ववक्षतुः।। ॥26॥

पदपाठ- यदा। वृत्रम्। नदीऽवृतम्। शवसा। वज्रिन्। अवधीः।
आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः।।

मन्त्रार्थ- हे वज्रवान् इन्द्र। जब तुमने नदी के जल के प्रवाह को रोकने वाले वृत्र को बल से मारा, उसके बाद ही दो तेजस्वी घोड़े तुझे ले गए।

मन्त्र- यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे।
आदित्ते हर्यता हरी ववक्षतुः।। ॥27॥

पदपाठ- यदा। ते। विष्णुः। ओजसा। त्रीणि। पदा। विऽचक्रमे।
आत्। इत्। ते। हर्यता। हरी इति। ववक्षतुः।।

मन्त्रार्थ- [हे इन्द्र!] जब तुम्हारे अनुज [व्यापनशील देव] विष्णु ने बल से, तीन पदों से, तीनों लोकों को नाप लिया, उसके बाद ही दो तेजस्वी घोड़े तुम्हें ले गए।

मन्त्र- यदा ते हर्यता हरी वावृधाते दिवेदिवे।
आदित्ते विश्वा भुवनानि येमिरे।। ॥28॥

पदपाठ- यदा। ते। हर्यता। हरी इति। ववृधाते इति। दिवेऽदिवे।
आत्। इत्। ते। विश्वा। भुवनानि। येमिरे।।

मन्त्रार्थ- हे इन्द्र। जब तुम्हारे तेजस्वी घोड़े प्रतिदिन वृद्धि को प्राप्त हुए, उसके बाद ही तुमने समस्त भुवनों को नियम में रखा।

- -

मन्त्र- यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे।
आदित्ते विश्वा भुवनानि येमिरे।। §29§

पदपाठ- यदा। ते। मारुतीः। विशः। तुभ्यम्। इन्द्र। निऽयेमिरे।
आत्। इत्। ते विश्वा। भुवनानि। येमिरे।।

मन्त्रार्थ- हे इन्द्र ! जब तुम्हारी मरुद्रूपी प्रजाएं तेरे लिए §समस्त§ प्रजा को नियन्त्रित करती हैं, उसके बाद ही तूने समस्त भुवनों को नियम में रखा।

मन्त्र- यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः।
आदित्ते विश्वा भुवनानि येमिरे।। § 30§

पदपाठ- यदा। सूर्यम्। अमुम्। दिवि। शुक्रम्। ज्योतिः। अधारयः।
आत्। इत्। ते। विश्वा। भुवनानि। येमिरे।।

मन्त्रार्थ- §हे इन्द्र !§ जब §तुमने§ इस §विप्रकृष्ट§ निर्मल, द्योतमान, सूर्य को द्युलोक में §जगत को प्रकाशित करने हेतु§ स्थापित किया। उसके बाद ही तूने समस्त भुवनों को नियम में रखा।

मन्त्र- इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः।
जामिं पदेव पिप्रतीं प्राध्वरे।। §31§

पदपाठ- इमाम्। ते। इन्द्र। सुऽस्तुतिम्। विप्रः। इयर्ति। धीतिऽभिः।
जामिम्। पदाऽइव। पिप्रतीम्। प्र। अध्वरे।।

- -

मन्त्रार्थ- हे इन्द्र ! जैसे कोई अपने बन्धु को उत्कृष्ट स्थान पर ले जाता है, उसी प्रकार मेधावी स्तोता इन (आगे चलने वाली) प्रसन्नता वर्धक, शोभन स्तुति को (यज्ञों के) परिचरण कर्मों के साथ यज्ञ में ले जाता है।

मन्त्र- यदस्य धामनि प्रिये समीचीनासो अस्वरन्।
नाभा यज्ञस्य दोहना प्राध्वरे।। (32)

पदपाठ- यत्। अस्य। धामनि। प्रिये। सम्ऽईचीनासः। अस्वरन्।
नाभा। यज्ञस्य। दोहना। प्र। अध्वरे।।

मन्त्रार्थ- यज्ञ के केन्द्र भाग में सोम का अभिषव स्थान (अर्थात् वेदी) इस (इन्द्र) के प्रिय स्थान में एकत्रित होकर (साथ-साथ) स्तुति करने वाले (स्तोतागण) उच्च स्वर से स्तुति करते हैं।

मन्त्र- सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः।
होतेव पूर्वचित्तये प्राध्वरे।। (33)

पदपाठ- सुऽवीर्यम्। सुऽअश्व्यम्। सुऽगव्यम्। इन्द्र। दद्धि। नः।
होताऽइव। पूर्वऽचित्तये। प्र। अध्वरे।।

मन्त्रार्थ- हे इन्द्र ! हमें शोभन बल, उत्तम घोड़े, शोभन गायों वाला धन दो। मैं यज्ञ में होता के समान, प्रथम प्रज्ञानवान् होने हेतु, तुम्हारी स्तुति करता हूँ।

- -

"ऋग्वेद" अष्टम मण्डल, सूक्त संख्या-38

मन्त्र- ऋषि-श्यावाश्य आत्रेयः। देवता-इन्द्राग्नी। छन्द-गायत्री।

